आपस्तम्बीय विवाह मन्त्राः

२.४.२. प्र सु ग्मन्ता धियसानस्य सक्षणि वरेभिर्वराँ अभि षु प्रसीदतः ।
अस्माकमिन्द्र उभयं जुजोषिति यत्सोम्यस्यान्धसो बुबोधिति ॥
अनृक्षरा ऋजवः सन्तु पन्था येभिः सखायो यन्ति नो वरेयम् ।
समर्यमा सम्भगो नो निनीयात् सं जास्पत्यं सुयममस्तु देवाः ॥)

२.४.३. अभ्रातृघ्नीं वरुणापतिघ्नीं बृहस्पते ।
इन्द्रापुत्रघ्नीं लक्ष्म्यं तामस्यै सवितस्सुव ॥

२.४.४. अघोरचक्षुअरपतिध्न्ये धि शिवा पशुभ्यः सुमना सुवर्चाः ।
वीरसूर्देवकामा स्योना शं नो भव द्विपदे शं चतुष्पदे ॥

२.४.५. इदमहं या त्वयिं पतिघ्न्यलक्ष्मिस्तां निर्दिशामि ॥

२.४.६. जीवां रुदन्ती विमयन्तो अध्वरे दीर्घामनुप्रसितिं दीधियुर्नरः ।
वामं पितृभ्यो य इदं समेरिरे मयः पतिभ्यो जनयः परिष्वजे ॥

२.४.७. व्युक्षत्क्रूरमुदचन्त्वाप आस्यै ब्राह्मणा स्नपनँ हरन्तु ।
अवीरघ्नीरुदचन्त्वापः ॥

२.४.८. अर्यम्णो अग्निं परिं यन्तु क्षिप्रं प्रतीक्षान्ताँ श्वश्रुवो देवरार्श्व ॥
खेऽनसः खे रथः खे युगस्य शचीपते ।
अपालमिन्द्र त्रिः पूत्व्यकरत्सूर्यवर्चसम् ॥
शं ते हिरण्यँ समु शन्त्वापश्शं ते मेथी भवतु शं युगस्य तृत्म ।
शं त आपश्शतपवित्रा भवन्त्वथा पत्या तन्वँ सँ सृजस्व ॥
हिरण्यवर्णाः शुचयः पावकाः प्र चक्रमुर्हित्वावद्यमापः ।
शतं पवित्रा वितता ह्यासु ताभिष्ट्वा देवस्सविता पुनातु ॥
हिरण्यवर्णाः शुचयः पावका यासु जातः कश्यपो यास्विग्निः ।
या अग्निं गर्भे दधिरे सुवर्णास्तास्त आपश्शँ स्योना भवन्तु ॥
यासाँ राजा वरुणो याति मध्ये सत्यानृते अवपश्यञ्जनानाम् ।
या अग्निं गर्भे दधिरे सुवर्णास्तास्त आपश्शँ स्योना भवन्तु ॥
यासाँ देवा दिवि कृण्वन्ति भक्ष्यं या अन्तरिक्षे बहुधा निविष्टाः ।
या अग्निं गर्भे दधिरे सुवर्णास्तास्त आपश्शँ स्योना भवन्तु ॥
शिवेन त्वा चक्षुषा पश्यन्त्वापश्शिवयां तन्वोपं स्पृशन्तु त्वचं ते ।
घृतश्चुतश्शुचयो याः पावकास्तास्त अपश्शँ स्योना भवन्तु ॥

परि त्वा गिर्वणो गिर इमा भवन्तु विश्वतः ।
वृद्धायुमनु वृद्धयो जुष्टा भवन्तु जुष्टयः ॥
आशासाना सौमनसं प्रजाँ प्रजाँ सौभाग्यं तनूम् ।
अग्नेरनुव्रता भूत्वा सं नह्ये सुकृताय कम् ॥

२.४.९. पूषा त्वेतो नयतु हस्तगृह्याश्विनौ त्वा प्र वहतां रथेन ।
गृहान्गच्छ गृहपत्नी यथासो वशिनी त्वं विदथमा वदासि ॥

२.४.१०. सोमः प्रथमो विविदे गन्धर्वो विविद उत्तरः ।
तृतीयो अग्निष्टे पतिस्तुरीयस्ते मनुष्यजाः ॥
सोमो ददद्गन्धर्वाय गन्धर्वो दददग्नये ।
रयिं च पुत्राँश्चादादग्निर्मह्यमथो इमाम् ॥

२.४.१४. गृभ्णामि ते सुप्रजस्त्वाय हस्तं मया पत्या जरदष्टिर्यथासः ।
भगो अर्यमा सविता पुरन्धिर्मह्यं त्वादुर्गार्हपत्याय देवाः ॥
ते ह पूर्वे जनासो यत्र पूर्ववतो हिताः ।
मूर्धन्वान्यत्र सौभ्रवः पूर्वो देवेभ्य आतपत् ॥
सरस्वति प्रेदमव सुभगे वाजीनीवति ।
तां त्वा विश्वस्य भूतस्य प्र गायामस्यग्रतः ॥
य एतिं प्रदिशस्सर्वा दिशोऽनु पवमानः ।
हिरण्यहस्त एरम्मस्स त्वा मन्मनसं कृणोतु ॥

२.४.१५. एकमिषे विष्णुस्त्वान्वेतु ।
द्वे ऊर्जे विष्णुस्त्वान्वेतु ।
त्रीणि व्रताय विष्णुस्तान्वेतु ।
चत्वारि मायोभवाय विष्णुस्तान्वेतु ।
पञ्च पशुभ्यो विष्णुस्तान्वेतु ।
षड्टतुभ्यो विष्णुस्तान्वेतु ।
सप्त सप्तभ्यो होत्राभ्यो विष्णुस्तान्वेतु ।

२.४.१६. सखा सप्तपदा भव सखायौ सप्तपदा बभूव ।
सख्यं ते गमेयँ सख्यात्ते मा योषं सख्यान्मे मा योष्ठाः ।
समयाव सं कल्पावहै संप्रियौ रोचिष्णू सुमनस्यमानौ ।
इषमूर्जमभि संवसानौ । सं नो मनाँसि सं व्रता समु चित्तान्या करम् ।

सा त्वमस्यमूहममूहमस्मि सा त्वं द्योरहं पृथिवी त्वं रेतोऽहं रेतोभृत्त्वं मनोऽहमस्मि वाक्त्वँ सामाहमस्म्यृक्त्वँ सा मामनुव्रता भव पुँसे पुत्राय वेत्तवै श्रियै पुत्राय वेत्तवा एहि सूनृते ॥

२.५.१. सोमाय जनिविदे स्वाहा ।
गन्धर्वाय जनिविदे स्वाहा ।
अग्नये जनिविदे स्वाहा ।
कन्यला पितृभ्यो यती पतिलोकमव दीक्षादास्थ स्वाहा ।
प्रेतो मुञ्चाति नामुतस्सुबद्धाममुनुस्करत् ।
यथेयमिन्द्र मीढ्वस्सुपुत्रा सुभगासति ॥
इमां त्वमिन्द्र मीढ्वस्सुपुत्रां सुभगां कुरु ।
दशाभ्यां पुत्रानाधेहि पतिमेकादशं कृधि ॥
अग्निरैतु प्रथमो देवतानाम् सोऽस्यै प्रजां मुञ्चतु मृत्युपाशात् ।
तदयं राजा वरुणोऽनुमन्यतां यथेयम् स्त्री पौत्रमघं न रोदात् ।
इमामग्निस्त्रायतां गार्हपत्यः प्रजामस्यै नयतु दीर्घमायुः ।
अशून्योपस्था जीवतामस्तु माता पौत्रमानन्दमभिविबुध्यामियम् ।
मा ते गृहे निशि घोष उत्थादन्यत्र त्वद्रुदत्यस्संविशन्तु ।
मा त्वं विकेश्युर अवधिष्टा जीवपत्नी पतिलोके
विराज पश्यन्ती प्रजां सुमनस्यमानां ॥
द्योस्ते पृष्टं रक्षतु वायुरूरू अश्विनौ च स्तनं धयन्तँ सविताभि रक्षतु ।
आ वासस: परिधानाद्बृहस्पतिर्विश्वे देवा अभिरक्षन्तु पश्चात् ॥
अप्रजस्तां पौत्रमृत्युं पाप्मानमुत वाघम् ।
शीर्णा स्रजमिवोन्मुच्य द्विषद्भ्यः प्रति मञ्चामि पाशम् ॥
इमं मे वरुण श्रुधी हवमद्या च मृडय । त्वामवस्युरा चके ॥
तत्वा यामि ब्रह्मणा वन्दमानस्तदा शास्ते यजमानो हविर्भिः ।
अहेडमानो वरुणेह बोध्युरुशँस मा न आयुः प्र मोषीः ॥
त्वं नो अग्ने वरुणस्य विद्वान्देवस्य हेडोऽवं यासिसीष्ठाः ।
यजिष्ठो वह्नितमश्शोश्रुचानो विश्वा द्वेषाँसि प्र मुमुग्ध्यस्मत् ॥
स त्वं नो अग्नेऽवमो भवोती नेदिष्ठो अस्या उषसो व्युष्टौ ।

अव यक्ष्व नो वरुणँ रराणो वीहि मृडीकँ सुहवो न एधी ॥
त्वमग्ने अयास्ययासन्मनसा हितः ।
अयासन्हव्यसूहिषेऽया नो धेहि भेषजम् ॥

२.५.२. आतिष्ठेममश्मानमश्मेव त्वं स्थिरा भव ।
अभितिष्ठ पृतन्यतस्सहस्व पृतनायतः ॥
२.५.५. इयं नार्युप ब्रूते कुल्यान्यावपन्तिका ।
दीर्घायुरस्तु मे पतिर्जीवातु शरदश्शतं ॥
२.५.७. तुभ्यमग्रे पर्यवहन् सूर्याम् वहतुना सह ।
पुनः पतिभ्यो जायां दा अग्ने प्रजया सह ॥
पुनः पत्नीमग्निरदादायुषा सह वर्चसा ।
दीर्घायुर्स्या यः पतिस्म एतु शरदशतम् ॥
विश्वा उत त्वया वयं धारा उदन्या इव ।
अति गाहेमहि द्विषः ॥
आतिष्ठेममश्मानम् ॥
२.५.८. अर्यमणं नु देवं कन्या अग्निमयक्षत ।
स इमां देवो अध्वरः प्रेतो मुञ्चाति नामुतस्सुबद्धाममुतस्करत् ॥
२.५.९. तुभ्यमग्रे पर्यवहन् ॥
पुनः पत्नीमग्निरदात् ॥
विश्वा उत त्वया वयम् ॥
आतिष्ठेममश्मानम् ॥
त्वमर्यमा भवसि यत्कनीनां नाम स्वधावत्स्वर्ये बिभार्षि ।
अञ्जन्ति वृक्षं सुधितं त गोभिर्यद्दंपती समनसा कृणोषि ॥
२.५.१०. तुभ्यमग्रे पर्यवहन् ॥
पुनः पत्नीमग्निरदात् ॥
विश्वा उत त्वया वयम् ॥
२.५.१३. प्र त्वा मुञ्चामि वरुणस्य पाशाद् येन त्वाबध्नात् सविता सुकेतः ।
धातुश्च योनौ सुकृतस्य लोके स्योनं ते सह पत्या कृणोमि ॥
इमं वि ष्यामि वरुणस्य पाशं यमबध्नीत सविता सुशेवः ।

धातुश्च योनौ सुकृतस्य लोकेऽरिष्टां त्वा सह पत्या कृणोमि ॥
२.५.२०. अयाश्चाग्नेऽस्यनभिशस्तीश्च सत्यमित्त्वमया असि ।
अयसा मनसा धृतोऽयसा हव्यमूहिषेऽया नो धेहि भेषजम् ॥
२.५.२१. सत्येनोत्तभिता भूमिस्सूर्येणोत्तभिता द्यौः ।
ऋतेनादित्यास्तिष्ठन्ति दिवि सोमो अधि शितः ॥
२.५.२२. युञ्जन्ति ब्रध्नमरुषं चरन्तं परि तस्थुषः ।
रोचन्ते रोचना दिवि ॥
योगेयोगे तवस्तरं वाजेवाजे हवामहे ।
सखाय इन्द्रमूतये ॥
२.५.२३. सुकिँशुकँ शल्मलिं विश्वरूपँ हिरण्यवर्णँ सुवृतँ सुचक्रम् ।
आरोह वध्वमृतस्य लोकं स्योनं पत्ये वहतुं कृणुष्व ॥
उदुत्तरमारोहन्ती व्यस्यन्ती पृतन्यतः ।
मूर्धानं पत्युरा रोह प्रजया च विराड्भव ॥
सम्राज्ञी श्वशुरे भव सम्राज्ञी श्वश्वां भव ।
ननान्दरि सम्राज्ञी भव सम्राज्ञी अधि देवृषु ॥
स्नुषाणाँ श्वश्रुराणां प्रजायाश्च धनस्य च ।
पतीनां च देवृणां च सजातानां विराड्भव ॥
२.५.२४. नीललोहितं भवतः कृत्यासक्तिर्व्यज्यते ।
एधन्ते अस्या ज्ञातयः पतिर्बन्धेषु बध्यते ॥
२.५.२५. ये वध्वश्चन्द्रं वहतुं यक्ष्मा यन्ति जनाँ अनु ।
पुनस्तान्यज्ञिया देवा नयन्तु यत आगताः ॥
मा विदन्परिपन्थिनो य असीदन्ति दम्पती ।
सुगेभिर्दुर्गमतीतामप द्रान्त्वरातयः ॥
सुगं पन्थानमारुक्षमरिष्टँ स्वस्तिवाहनम् ।
यस्मिन्वीरो न रिष्यत्यन्येषां विन्दते वसु ॥
२.५.२६. ता मन्दसाना मनुषो दुरोण आ धत्तँ रयिं दशवीरं वचस्यवे ।
कृतं तीर्थँ सुप्रमाणँ शुभस्पती स्थाणुं पथेष्ठामप दुर्मतिँ हतम् ॥
२.६.१. अयं नो मह्याः पारँ स्वस्ति नेषड्वनस्पतिः ।
सीरा नस्सुतरा भव दीर्घायुत्वाय वर्चसे ॥

२.६.३. अस्य पारे निर्ऋथस्य जीवा ज्योतिरशीमहि ।
मह्या इन्द्र स्वस्तये ॥
२.६.४. यद्दते चिदभिश्रिषः पुरा जर्तुभ्य आतृदः ।
संधाता सन्धिं मघवा पुरोवसुर्निष्कर्ता विह्रुतं पुनः ॥
इडामग्ने पुरुदँसँ सनिं गोश्शश्वत्तमँ हवमानाय साध ।
स्यान्नस्सूनुस्तनयो विजावाग्ने सा ते सुमतिर्भूत्वस्मे ॥
इमं मे वरुण ॥
तत्वा यामि ॥
त्वं नो अग्ने ॥
स त्वं नो अग्ने ॥
त्वमग्ने अयासि ॥
२.६.५. ये गन्धर्वा अप्सरसश्च देवीरेषु वृक्षेषु वानस्पत्येष्वासते ।
शिवास्त अस्यै वध्वै भवन्तु मा हिँसिषुर्वहतुमूह्यमानाम् ॥
या ओषधयो या नद्यो यानि धन्वानि ये वनां ।
ते त्वा वधु प्रजावतीं प्र त्वे मुञ्चन्त्वँहसः ॥
२.६.६. सं काशयामि वहतुं ब्रह्मणा गृहैरघोरेण चक्षुषा मैत्रेण ।
पर्याणद्धं विश्वरूपं यदस्याँ स्योनं पतिभ्यस्सविता कृणोतु तत् ॥
२.६.७. आ वामगन्त्सुमतिर्वाजिनीवसू न्यश्विना हृत्सु कामाँ अयँसत ।
आभूतं गोपा मिथुना शुभस्पती प्रिया अर्यम्णो दुर्याँ अशीमहि ॥
अयं नोदेवस्सविता ब्रहस्पतिरिन्द्राग्नी मित्रावरुणा स्वस्तये ।
त्वष्टा विष्णुः प्रजया संरराणः काम आयातं त्वा विमुञ्चतु ॥
२.६.७. शर्म वर्मेदमा भरास्यै नार्या उपस्तिरे ।
सिनीवालि प्र जायतामियं भगस्य सुमतावसत् ॥
गृहान्भद्रान्त्सुमनसः प्र पद्येऽवीरघ्नी वीरवतस्मुवीरान् ।
इरां वहतो घृतमुक्षुमाणस्तेष्वहँ सुमनास्संविशामि ॥
२.६.१०. आगन्गोष्ठं महिषी गोभिरश्वैरायुष्मत्पत्नी प्रजया स्वर्वित् ।
वह्वीं प्रजां जनयन्ती सुरत्नेममग्निँ शतहिमास्सपर्यात् ॥
अयमग्निर्गृहपतिस्सुसँत्पुष्ठिवर्धनः ।
यथा भगस्याभ्यां ददद्रयिं पुष्टिमथो प्रजाम् ॥

प्रजाया आभ्यां प्रजापत इन्द्राग्नी शर्म यच्छतम् ।
यथैनर्योन प्रमीयातां उभयोर्जीवतोः प्रजा ॥
तेन भूतेन हविषायमा प्यायतां पुनः ।
जायतां यामस्मा आवाक्षुस्ताँ रसेनाभि वर्धताम् ॥
अभि वर्धातां पयसाभि राष्ट्रेण वर्धताम् ।
रय्या सहस्रपोषसेमौ स्तामनपोक्षितौ ॥
इहैव स्तं मा वि योष्टं विश्वमायुर्व्यश्नुतम् ।
मह्या इन्द्र स्वस्तये ॥
ध्रुवैधि पोष्या मयि मह्यं त्वादाद्बृहस्पतिः ।
मया पत्या प्रजावती सं जीव शरदशतम् ॥
त्वष्टा जायामजनयत्त्वष्टास्यै त्वां पतिम् ।
त्वष्टा सहस्रमायूँषि दीर्घमायुः कृणोतु वाम् ॥
इमं मे वरुण ॥
तत्त्वा मयि ॥
त्वं नो अग्ने ॥
स त्वं नो अग्ने ॥
त्वमग्ने अयासि ॥
इह गावः प्र जायध्वमिहाश्वा इह पुरुषाः ।
इहो सहस्रदक्षिणो रायस्पोषो निषीदतु ॥
२.६.११. सोमेनादित्या बलिनस्सोमेन पृथिवी दृढा ।
अथो नक्षत्राणामेषामुपस्थे सोम आधितः ॥
प्रस्व स्थः प्रेयं प्रजया भुवने शोचेष्ट ॥
इह प्रियं प्रजया ते समृध्यतामस्मिन्गृहे गार्हपत्याय जागृहि ।
एना पत्या तन्वँ सँ सृजस्वाथा जीव्री विदथमा वदासि ॥
सुमङ्गलीरियं वधूरिमां समेत पश्यत ।
सौभाग्यामस्यै दत्वायाथास्तं विपरेतन ॥
२.६.१२. ध्रुवक्षितिर्ध्रुवयोनिर्ध्रुवमसि ध्रुवत स्थितम् ।
त्वं नक्षत्राणां मेथ्यसि स मा पाहि पृतन्यतः ॥
सप्तर्षयः प्रथमां कृत्तिकानामरुन्धतीं यद्ध्रुवताँ ह नित्युः ।

षट् कृत्तिकां मुख्ययोगं वहन्तीयमस्माकमेधत्वष्टमी ॥
३.८.२. सदसस्पतिमद्भुतम् प्रियमिन्द्रस्य काम्यम् ।
सनिं मेधामयासिषम् ॥
३.८.५. उद्दीप्यस्व जातवेदोऽपघ्नन्निर्ऋतिं मम ।
पशूँश्च मह्यमा वह जीवनं च दिशे दिश ॥
मा नो हिँसीज्जातवेदो गामश्वं पुरुषं जगत् ।
अबिभ्रदग्न आ गाहि श्रिया मा परि पातय ॥
३.८.१०. उदीर्ष्वातो विश्वावसो नमसेडामहे त्वा ।
अन्यामिच्छ प्रभर्व्यँ सं जायां पत्या सृज ॥
उदीर्ष्वात पतिवति ह्येषा विश्वावसुं नमसा गीर्भिरिट्टे ।
अन्यामिच्छ पितृषदं वित्ताँ स ते भागो जनुषा तस्य विद्धि ॥
अग्ने प्रायश्चित्ते त्वं देवानां प्रायश्चित्तिरसि ब्राह्मणस्त्वां
नाथकामः प्र पद्ये यास्यां पतिघ्नी तनूः
प्रजाघ्नी पशुघ्नी लक्ष्मिघ्नी जारघ्नीमस्यै तां कृणोमि स्वाहा ॥
वायो प्रायश्चित्ते... ॥
आदित्य प्रायश्चित्ते... ॥
प्रजापते प्रायश्चित्ते त्वं देवानां प्रायश्चित्तिरसि ब्राह्मणस्त्वां
नाथकामः प्र पद्ये यास्यां पतिघ्नी
तनूः प्रजाघ्नी पशुघ्नी लक्ष्मिघ्नी जारघ्नीमस्यै तां कृणोमि स्वाहा ॥
प्रसवश्चोपयामश्च काटश्चार्णवश्च धर्णसिश्च द्रविणं च भगश्चान्तरिक्षं च
सिन्धुश्च समुद्रश्च सरस्वाँश्च विश्वव्यचाश्च ते यं द्विष्मो यश्च नो द्वेष्टि
तमेषां जम्मे दध्म स्वाहा ॥
मधुश्च माधवश्च शुक्रश्च शुचिश्च नभश्च नभस्यश्चेषश्चोर्जश्च सहश्च सहस्यश्च
तपश्च तपस्यश्च ते यं द्विष्मो यश्च नो द्वेष्टि तमेषां जम्भे दध्म स्वाहा ॥
चित्तं च चित्तिश्चाकूतं चाकूतिश्चाधीतं चाधीतिश्च
विज्ञातं च विज्ञानं च नाम च क्रतुश्च दर्शश्च
पूर्णमासश्च ते यं द्विष्मो यश्च नो द्वेष्टि तमेषां जम्भे दध्म स्वाहा ॥
भू स्वाहा ॥ भुव स्वाहा ॥ सुव स्वाहा ॥ ॐ स्वाहा ॥
अपश्यं त्वा मनसा चेकितानं तपसो जातं तपसो विभूतम् ।

इह प्रजामिह रयिं रराणः प्र जायस्व प्रजयां पुत्रकाम ॥
अपश्यं त्वा मनसा दीध्यानाँ स्वायां तनूँ ऋत्विये नाथमानाम् ।
उप मामृच्चा युवतिर्बभूयाः प्र जायस्व प्रजयां पुत्रकाम ॥
समञ्जन्तु विश्वे देवाः समापो हृदयानि नौ ।
सं मातरिश्वा सं धाता समु देष्ट्री दिदेष्टु नौ ॥
प्रजापते तन्वं मे जुषस्व त्वष्टर्देवेभिसहसाम इन्द्र ।
विश्वैर्देवै एतिभिसाँरराणः पुँसां बहूनां मातरं स्याम ॥
आ नः प्रजां जनयतु प्रजापतिराजरसाय समनक्त्वर्यमा ।
अदुर्मङ्गलीः पतिलोकमा विश शं न एधि द्विपदे शं वतुष्पदे ॥
तां पूषञ्छिवतमामेरयस्व यस्यां बीजं मनुष्या वपन्ति ।
या न ऊरू उशति विस्रयातै यस्यामुशन्त प्रहरेम शेपम् ॥
आ रोहोरुमुप बर्हस्व बाहुं परि ष्वजस्व जायाँ सुमनस्यमानः ।
तस्यां पुष्यतं मिथुनौ सयोनी बह्वीं प्रजां जनयन्तौ सरेतसा ॥
आर्द्रयारण्या यत्रामन्थत्पुरुषं पुरुषेण शक्रः ।
तदेतौ मिथुनौ सयोनी प्रजयामृतेनेह गच्छतम् ॥
अहं गर्भमदधामोषधीष्वहं विश्वेषु भुवनेष्वन्तः ।
अहं प्रजा अजनयं पितृणामहं जनिभ्यो अपरीषु पुत्रान् ॥
पुत्रिणेमा कुमारिणा विश्वमायुर्व्यश्नुतम् ।
उभा हिरण्यपेशसा ॥
वीतिहोत्रा कृतद्वसू दशस्यन्त्वामृताय कम् ।
शमूधो रोमशँ हथो देवेषु कृणुतो दुवः ॥

३.८.१३. विष्णुर्योनिं कल्पयतु त्वष्टा रूपाणि पिंशतु ।
आसिञ्चतु प्रजापतिर्धाता गर्भं दधातु ते ॥
गर्भं धेहि सिनीवालि गर्भं धेहि सरस्वति ।
गर्भं ते अश्विनौ देवावाधत्तां पुष्करस्रजा ॥
हिरण्ययी अरुणी यं निर्मन्थतो अश्विना ।
तंते गर्भं दधाम्यहं दशमे मासि सूतवे ॥
मथेयं पृथिवी मही तिष्ठन्ती गर्भमादधे ।

एवं त्वं गर्भमा धत्स्व दशमे मासि सूतवे ॥
यथा पृथिव्यऽग्निगर्भा द्यौर्यथेन्द्रेण गर्भिणी ।
वायुर्यथा दिशां गर्भ एवं गर्भं दधातु ते ॥
विष्णो श्रेष्टेन रूपेणास्यां नार्या गवीन्याम् ।
पुमाँसं गर्भमा धेहि दशमे मासि सूतवे ॥
नेजमेष परा पत सुपुत्रः पुतरा पत ।
अस्यै मे पुत्रकामायै गर्भमा धेहि यः पुमान् ॥
व्यस्य योनिं प्रति रेतो गृहाण पुमान्पुत्रो धीयतां गर्भो अन्तः ।
तं माता दश मासो बिभर्तु स जायतां वीरतम स्वानाम् ॥
आ ते गर्भो योनिमेतु पुमान्बाण इवेषुधिम् ।
आ वीरो जायतां पुत्रस्ते दशमास्यः ॥
करोमि ते प्राजापत्यमा गर्भो योनिमेतु ते ।
अनूनः पूर्णो जायतामश्लोणोऽपिशाचधीतः ॥
पुमाँस्ते पुत्रो नारि तं पुमाननु जायताम् ।
तानि भद्राणि बीजान्यृषभा जनयन्तु नौ ॥
यानि भद्राणि बीजान्यृषभा जनयन्तु नः ।
तैस्त्वं पुत्रान्विन्दस्व सा प्रसुर्धेनुक्ता भव ॥
कामप्रभुध्यतां मह्यमपराजितमेव मे ।
यं कामं कामयेदेव तं मे वायो समर्धय ॥
जरां गच्छ परिधत्स्व वासो भवाकृष्टीनामभिशस्तिपावा ।
शतं च जीव शरदः सुवर्च्चा रयिं च पुत्राननुसंव्ययस्व ॥